नलोपाख्यानम्

24

बृहदश्व उवाच।

दमयन्ती तु तच्छ्रुत्वा भृशं शोकपरायणा।

शङ्कमाना नलं तं वै केशिनीमिदमब्रवीत्॥ ३-७३-१ ॥

गच्छ केशिनि भूयस्त्वं परीक्षां कुरु बाहुके।

अब्रुवाणा समीपस्था चरितान्यस्य लक्षय॥ ३-७३-२ ॥

यदा च किंचित्कुर्यात्स कारणं तत्र भामिनि।

तत्र संचेष्टमानस्य संलक्ष्यं ते विचेष्टितम्॥ ३-७३-३ ॥

न चास्य प्रतिबन्धेन देयो ऽग्निरपि भामिनि।

याचते न जलं देयं सम्यगत्वरमाणया॥ ३-७३-४॥

एतत्सर्वं समीक्ष्य त्वं चरितं मे निवेदय।

यच्चान्यदपि पश्येथास्तच्चाख्येयं त्वया मम॥ ३-७३-५॥

दमयन्त्यैवमुक्ता सा जगामाथाशु केशिनी।

निशाम्य च हयज्ञस्य लिङ्गानि पुनरागमत्॥ ३-७३-६ ॥

सा तत्सर्वं यथावृत्तं दमयन्त्यै न्यवेदयत्।

निमित्तं यत्तदा दृष्टं बाहुके दिव्यमानुषम्॥ ३-७३-७॥

केशिन्युवाच।

दृढं शुच्युपचारो ऽसौ न मया मानुषः क्वचित्।

दृष्टपूर्वः श्रुतो वापि दमयन्ति तथाविधः॥ ३-७३-८॥

ह्रस्वमासाद्य संचारं नासौ विनमते क्वचित्।

तं तु दृष्ट्वा यथासङ्गमुत्सर्पति यथासुखम्।

संकटे ऽप्यस्य सुमहद्विवरं जायते ऽधिकम्॥ ३-७३-९॥

ऋतुपर्णस्य चार्थाय भोजनीयमनेकशः।

प्रेषितं तत्र राज्ञा च मांसं सुबहु पाशवम्॥ ३-७३-१०॥

तस्य प्रक्षालनार्थाय कुम्भस्तत्रोपकल्पितः।

स तेनावेक्षितः कुम्भः पूर्ण एवाभवत्तदा॥ ३-७३-११॥

ततः प्रक्षालनं कृत्वा समधिश्रित्य बाहुकः।

तृणमुष्टिं समादाय आविध्यैनं समादधत्॥ ३-७३-१२॥

अथ प्रज्वलितस्तत्र सहसा हव्यवाहनः।

तदद्भुततमं दृष्ट्वा विस्मिताहमिहागता॥ ३-७३-१३॥
अन्यच्च तस्मिन्सुमहदाश्चर्यं लक्षितं मया।
यदग्निमपि संस्पृश्य नैव दह्यत्यसौ शुभे॥ ३-७३-१४॥
छन्देन चोदकं तस्य वहत्यावर्जितं द्रुतम्।
अतीव चान्यत्सुमहदाश्चर्यं दृष्टवत्यहम्॥ ३-७३-१५॥
यत्स पुष्पाण्युपादाय हस्ताभ्यां ममृदे शनैः।
मृद्यमानानि पाणिभ्यां तेन पुष्पाणि तान्यथ॥ ३-७३-१६॥
भूय एव सुगन्धीनि हृषितानि भवन्ति च।
एतान्यद्भुतकल्पानि दृष्ट्वाहं द्रुतमागता॥ ३-७३-१७॥

बृहदश्व उवाच।

दमयन्ती तु तच्छ्रुत्वा पुण्यश्लोकस्य चेष्टितम्।
अमन्यत नलं प्राप्तं कर्मचेष्टाभिसूचितम्॥ ३-७३-१८॥
सा शङ्कमाना भर्तारं नलं बाहुकरूपिणम्।
केशिनीं श्लक्ष्णया वाचा रुदती पुनरब्रवीत्॥ ३-७३-१९॥
पुनर्गच्छ प्रमत्तस्य बाहुकस्योपसंस्कृतम्।
महानसाच्छृतं मांसं समादायैहि भामिनि॥ ३-७३-२०॥
सा गत्वा बाहुके व्यग्रे तन्मांसमपकृष्य च।
अत्युष्णमेव त्वरिता तत्क्षणं प्रियकारिणी।
दमयन्त्यै ततः प्रादात्केशिनी कुरुनन्दन॥ ३-७३-२१॥
सोचिता नलसिद्धस्य मांसस्य बहुशः पुरा।
प्राश्य मत्वा नलं सूदं प्राक्रोशद्भृशदुःखिता॥ ३-७३-२२॥
वैक्लव्यं च परं गत्वा प्रक्षाल्य च मुखं ततः।
मिथुनं प्रेषयामास केशिन्या सह भारत॥ ३-७३-२३॥
इन्द्रसेनां सह भ्रात्रा समभिज्ञाय बाहुकः।
अभिद्रुत्य ततो राजा परिष्वज्याङ्कमानयत्॥ ३-७३-२४॥
बाहुकस्तु समासाद्य सुतौ सुरसुतोपमौ।
भृशं दुःखपरीतात्मा सस्वरं प्ररुदोद ह॥ ३-७३-२५॥
नैषधो दर्शयित्वा तु विकारमसकृत्तदा।
उत्सृज्य सहसा पुत्रौ केशिनीमिदमब्रवीत्॥ ३-७३-२६॥
इदं सुसदृशं भद्रे मिथुनं मम पुत्रयोः।

ततो दृष्ट्वैव सहसा बाष्पमुत्सृष्टवानहम्॥ ३-७३-२७॥

बहुशः संपतन्तीं त्वां जनः शङ्केत दोषतः।

वयं च देशातिथयो गच्छ भद्रे नमो ऽस्तु ते॥ ३-७३-२८॥